वेदाञ्जलि, An International Peer Reviewed Refereed Research Journal
वर्ष-९, अंक-१७, भाग-१, जनवरी-जून, २०२२ | ISSN : 2349-364X | Impact Factor : 6.240

# लक्षणविचारः

डा. वि.वि.एस्.आर्.लक्ष्मीः*

**प्रमाणप्रमेयसंशयप्रयोजनदृष्टान्तसिद्धान्ताऽवयवतर्कनिर्णयवादजल्पवितण्डा-हेत्वाभासछलजातिनिग्रहस्थानानां तत्वज्ञानान्निःश्रेयसाधिगमः**[1] इति न्यायस्यादिमं सूत्रम्। **द्रव्यगुणकर्मसामान्यविशेषसमवायानां पदार्थानां साधर्म्यवैधर्म्याभ्यां तत्वज्ञानान्निःश्रेयसम्** इति वैशेषिकसूत्रम्। प्रमाणप्रमेयादिविषये एतयोः दर्शनयोः सादृश्यात् कालक्रमेण अनयोरेकशास्त्रत्वेन प्रतीतिः लोके दरीदृश्यते। लक्षणपरिष्कारेषु तर्कशास्त्रस्य वैशिष्ट्यं निरुपमानं वर्तते।

यावत्पर्यन्तं उद्देशलक्षणपरीक्षा न क्रियन्ते, तावत् प्रमाणादीनां तत्वज्ञानं न भवति। भाष्यकारः तदीयभाष्ये एवमाह - **त्रिविधास्य शास्त्रस्य प्रवृत्तिः उद्देशलक्षणंपरीक्षा चेति**[2]। तत्रोद्देशस्तु नामधेयेन पदार्थमात्रस्याभिधानम्। तत्रोद्दिष्टस्य तत्वव्यवच्छेदको धर्मो लक्षणम्। लक्षितस्य यथालक्षणमुपपद्यते न वेति प्रमाणैरवधारणं परीक्षा।

उद्देशस्तु सूत्रे कृतम्। लक्षणपरीक्षे प्रमाणादीनां तत्वज्ञानार्थं कर्तव्ये। ततः प्रमाणादीनां लक्षणम् उच्यते - प्रमाकरणं प्रमाणमित्यादिना। तत्र जिज्ञासा जायते- लक्षणशब्दार्थः कः, किं नाम लक्षणस्य लक्षणम् इति। तत् शान्तये लक्षणलक्षणमुच्यते- **दूषणत्रयरहितो धर्मो लक्षणम्**[3]। दूषणत्रयरहितत्वं च दूषणत्रयाभाववत्त्वम् इति। तथा च दूषणत्रयाभावविशिष्टधर्मत्वं लक्षणलक्षणमिति पर्यवस्यति। यथा वा **विशिष्टबुद्धिं प्रति विशेषणज्ञानस्य कारणत्वम्**[4] इति नियमानुगुणं नीलविशिष्टः घटः इति विशिष्टबुद्धिं प्रति विशेषणज्ञानस्य नीलज्ञानस्य कारणत्वमङ्गीक्रियते अर्थात् नीलज्ञानं विना नीलो घटः इति विशिष्टबुद्धिः नोत्पद्यते तथैव दूषणत्रयाभावविशिष्टः धर्मः इति विशिष्टबुद्धिं प्रति, विशेषणज्ञानस्य दूषणत्रयाभावरूपविशेषणज्ञानस्य कारणत्वमस्ति अर्थात् दूषणत्रयाभावज्ञानं विना दूषणत्रयाभावविशिष्टः धर्मः इति विशिष्टबुद्धिः नोत्पद्यते। उक्तविशेषणज्ञानं च - दूषणत्रयाभावज्ञानं च, दूषणत्रयज्ञानं विना न संभवति। कुतः इति चेत् - **अभावबुद्धौ प्रतियोगिज्ञानस्य कारणत्वम्** इति नियमः, तादृशनियमानुगुणं घटाभाव इति अभावबुद्धिं प्रति प्रतियोगिज्ञानस्य घटज्ञानस्य कारणत्वं यथा अङ्गीक्रियते अर्थात् घटज्ञानं विना घटाभावज्ञानं न जायतेत्यर्थः, तथैव दूषणत्रयाभावज्ञानं प्रति दूषणत्रयज्ञानं कारणम् इति, अतः दूषणत्रयज्ञानसंपादनार्थं तेषां लक्षणं प्रथमतया वक्तव्यम् - लक्षणस्य त्रीणि दूषणानि सन्ति, अव्याप्तिरतिव्याप्तिरसंभवः इति। तेषां प्रत्येक लक्षणं तावत् एवं - **लक्ष्यैकदेशावृत्तित्वम् अव्याप्तिः**[5]। **अलक्ष्यवृत्तित्वमतिव्याप्तिः**[6]। **लक्ष्यमात्राऽवर्तनमसम्भवः**[7]। **इति।**

**अव्याप्तिः** - गोः लक्षणं कपिलत्वं भवितुं नार्हति, यतः अत्र अव्याप्तिरूपदोषः वर्तते, तथा हि - लक्ष्यैकदेशावृतित्वम् अव्याप्तिः, प्रकृते लक्ष्यः गौः, लक्ष्यैकदेशः जेर्सी गौः, तस्मिन् गवि लक्षणस्य कपिलत्वमिति उक्त गो लक्षणस्य असत्त्वात् अव्याप्तिः। गोः कपिलत्वमिति इदं लक्षणम् अव्याप्तेः उदाहरणम्।

**अतिव्याप्तिः** - गोः श्रृङ्गित्वम् इति लक्षणं भवितुं नार्हति, यतः अत्र अतिव्याप्तिरूपदोषः वर्तते, तथा हि - अलक्ष्ये लक्षणस्य वृत्तित्वम् अतिव्याप्तिः, अलक्ष्यः लक्ष्यभिन्नः इत्यर्थः, प्रकृते लक्ष्यः गौः, अलक्ष्यः लक्ष्यभिन्नः महिषादयः, अलक्ष्ये महिषादौ लक्षणस्य श्रृङ्गित्वमिति उक्त गो लक्षणस्य सत्वात् अतिव्याप्तिः। गोः श्रृङ्गित्वमिति इदं लक्षणम् अतिव्याप्तेः उदाहरणम्।

*सहायकाचार्या, न्यायवैशेषिकविभागः, कर्णाटकसंस्कृतविश्वविद्यालयः, बेङ्गलूरु



Scanned with CamScanner

असंभवः - गोः एकशफवत्वम् इति लक्षणं भवितुं नार्हति, यतः अत्र असंभवरूपदोषः वर्तते, तथा हि - लक्ष्यमात्रे लक्षणस्य अवृत्तित्वम् असम्भवः, अत्र मात्रपदं कृत्स्नार्थकम्। प्रकृते लक्ष्यः गौः, लक्ष्यमात्रे निखिलगोषु लक्षणस्य एकशफवत्वस्य असत्वात् असम्भवः। गोः एकशफवत्वमिति इदं लक्षणम् असम्भवस्य उदाहरणम्।

तथा च उदाहृतदूषणत्रयरहितः यः धर्मः स एव लक्षणं भवितुमर्हति, यथा गोः **सास्नादिमत्वम्** इति। इदं च गोः निर्दुष्टं लक्षणम्। यतः अस्मिन् लक्षणे अव्याप्तिः-अतिव्याप्तिः - असंभवः वा नास्ति, तथा हि- सास्नादिमत्वं लक्ष्ये निखिलगोषु सत्वात् अव्याप्तिः - असम्भवो वा नास्ति, एवम् अलक्ष्ये महिषादिषु सास्नादिमत्वस्य असत्वात् अतिव्याप्तिरपि नास्ति, अतः सास्नादिमत्वमिति अयं धर्मः दूषणत्रयरहितः धर्मः, तथा च सास्नादिमत्वमेव गोः निर्दुष्टं लक्षणम्। अत्र दूषणत्रयरहितः धर्मः लक्षणम् इत्युक्तम्। अत्र रहितः इत्यस्य अभावेत्यर्थः। त्रित्वं अभावे विशेषणम् उत प्रतियोगिनि विशेषणम् वा इति संशयः अर्थात् दूषणत्रयाभावविशिष्टधर्मः लक्षणमिति उच्यते उत दूषणाभावत्रयविशिष्टधर्मः लक्षणमिति उच्यते वा इति संशयः।

यदि प्रथमपक्षः अर्थात् त्रित्वं अभावे विशेषणम् इति स्वीकृत्य दूषणत्रय अभावविशिष्टः धर्मः लक्षणम् इति कथ्यते चेत् कपिलत्वधर्मस्यापि गोलक्षणत्वापत्तिः, तथा हि- कपिलत्वरूपधर्मे अव्याप्तिरूप एकदोषस्य सत्वेपि, दोषत्रयं नास्ति अतः दोषत्रयाभावविशिष्टः धर्मः कपिलत्वरूपधर्मः भवितुमर्हति। अतः कपिलत्वस्यापि गोलक्षणत्वापत्तिः (त्रित्वं अभावे विशेषणम् इत्युच्यते चेत्) ।

पूर्वोक्तापत्तिवारणार्थं द्वतीयपक्षः अर्थात् त्रित्वं प्रतियोगिनि विशेषणम् इति स्वीकृत्य दूषणाभावत्रयविशिष्टधर्मः लक्षणमिति कथ्यते चेत् कपिलत्वधर्मस्य लक्षणत्वापत्तिः - नास्ति, कथमिति चेत् कपिलत्वधर्मः दूषणद्वयाभावविशिष्टः-(अतिव्याप्ति-असंभवरूपदूषणद्वयाभावविशिष्टः) धर्मः भवति चेदपि दूषणत्रयाभाव-विशिष्टधर्मः कपिलत्वं भवितुं नार्हति। तथा च यत्र एकोऽपि दूषणं नास्ति स एव दूषणत्रयाभावविशिष्टः धर्मः भवति। अतः कपिलत्वस्य लक्षणत्वापत्तिः नास्ति। एवं सास्नादिमत्वरूपधर्मे तु एकमपि दूषणं नास्ति, अतः स धर्मः दूषणत्रयाभावविशिष्टः धर्मः, तस्यैव गोलक्षणत्वं संभवति।

**असाधारणधर्मः लक्षणम्।** पूर्वं दूषणत्रयरहितः धर्मः लक्षणमित्युक्तम्, किन्तु इदानीम् असाधारणधर्मः लक्षणमित्युच्यते। तर्हि विरोधः लक्षणयोः इति चेत् उभयोः विरोधः नास्ति, यतो हि दूषणत्रयरहितः धर्मः यः स एव असाधारणधर्मः इत्युच्यते। तथा च असाधारणविशिष्टधर्मः लक्षणमिति पर्यवस्यति। तथा च दूषणत्रयरहितः धर्मः सास्नादिमत्वरूपो धर्मः एव असाधारणधर्मः इत्युच्यते।

असाधारणविशिष्टधर्मः इति विशिष्टबुद्धिं प्रति असाधारणेति विशेषणज्ञानं कारणम्। तथा च असाधारणत्वं नाम किम् इति परिष्करणीयम्, तादृशासाधारणत्वं सास्नादिमत्वे अस्तीति प्रदर्श्य तस्य गोः लक्षणत्वं संपादनीयम्। असाधारणत्वं च **लक्ष्यतावच्छेदकसमनियतत्वम्**[8], लक्ष्यतावच्छेदकसमनियतत्वं नाम लक्ष्यतावच्छेदक-व्यापकत्वे सति लक्ष्यतावच्छेदकव्याप्यत्वम् इति। लक्ष्यतावच्छेदकव्यापकत्वं नाम लक्ष्यतावच्छेदकाधिकरणवृत्ति अत्यन्ताभावाप्रतियोगित्वम् (लक्ष्यतावच्छेदकं यत्र यत्र वर्तते तत्र तत्र वर्तमानत्वम् इत्यर्थः)। लक्ष्यतावच्छेदकव्याप्यत्वं नाम लक्ष्यतावच्छेदकाभाववदवृत्तित्वमथवा लक्ष्यतावच्छेदकव्यापकतत्कत्वं वा (लक्ष्यतावच्छेदकं यत्र नास्ति तत्रावर्तमानत्वम् इत्यर्थः)। तथा च एतादृश लक्ष्यतावच्छेदकव्यापकत्वविशिष्ट एतादृशलक्ष्यतावच्छेदकव्याप्यत्वविशिष्टधर्मः एव असाधारणधर्मः। सास्नादिमत्वम् असाधारणधर्मः इति निर्णयस्तु तत्र लक्ष्यतावच्छेदकव्यापकत्वं, लक्ष्यतावच्छेदकव्याप्यत्वं सास्नादिमत्वे अस्ति चेदेव



Scanned with CamScanner

संभवति। समन्वयस्तु इत्थं - सास्नादिमत्वे लक्ष्यतावच्छेदकव्यापकत्वमस्ति, तथा हि - लक्ष्यः - निखिलगावः, लक्ष्यतावच्छेदकं- गोत्वं, लक्ष्यतावच्छेदकाधिकरणं- गोत्वाधिकरणं-गौः, लक्ष्यतावच्छेदकाधिकरणगोवृत्ति अत्यन्ताभावः - न सास्नादिमत्वाभावः, गवि सास्नादिमत्वस्यैव सत्वात् अपि तु घटाभावः, तत्प्रतियोगि घटः, प्रतियोगित्वं - घटे, तदप्रतियोगि - सास्नादिमत्वम्, तदप्रतियोगित्वं सास्नादिमत्वे सत्वात् लक्ष्यतावच्छेदकव्यापकत्वं सास्नादिमत्वे अस्ति। एवं सास्नादिमत्वे लक्ष्यतावच्छेदकव्याप्यत्वमस्ति, तथा हि - लक्ष्यः - गौः, लक्ष्यतावच्छेदकं- गोत्वं, तदभावः - गोत्वाभावः, लक्ष्यतावच्छेदकाभाववत् - गोत्वाभाववत् महिषादयः, तदवृत्तित्वं शृङ्गित्वे, तदवृत्तित्वं - सास्नादिमत्वे अस्ति। तथा च सास्नादिमत्वरूपधर्मे लक्ष्यतावच्छेदकव्यापकत्वे सति लक्ष्यतावच्छेदकव्याप्यत्वरूप असाधारणत्वमस्ति इति सास्नादिमत्वात्मकधर्मः असाधारणधर्मः, अतः सास्नादिमत्वरूपधर्मः गोलक्षणम्।

**लक्षणस्य प्रयोजनम्-** असाधारणधर्मः लक्षणम् इत्युक्तं, एतादृशलक्षणस्य किं प्रयोजनमित्यत्र अस्ति मतभेदः। व्यावृत्तेरेव लक्षणस्य प्रयोजनत्वमिति केचन। व्यवहारस्यापि लक्षणस्य प्रयोजनत्वमित्यन्ये।

**व्यावृत्तेः लक्षणप्रयोजनत्वमतप्रतिपादनम् -** लक्षणस्य प्रयोजनं व्यावृत्तिश्चेत् लक्षणं व्यावर्तकं भवति। व्यावर्तकं नाम इतरभेदानुमितिजनकत्वमित्यर्थः। तथा च लक्षणस्य इतरभेदानुमितिजनकत्वमेव प्रयोजनम् इति (यत् लक्षणं लक्ष्ये इतरभेदमनुमापयति तत् व्यावर्तकमित्यर्थः। तथा च गौः सास्नादिमत्वं (-हेतुः) लक्षणञ्चेत् तल्लक्षणस्य प्रयोजनं तु लक्ष्ये गवि इतरभेदानुमितिरेव। तथा हि- गो - स्वेतरभिन्ना - सास्नादिमत्वादिति अनुमानेन गवि इतरभेदानुमितिरेव सास्नादिमत्वादिति लक्षणस्य प्रयोजनम्।

व्यावर्तकस्य लक्षणत्वे, लक्षणलक्षणस्य लक्ष्यं भवति व्यावर्तकम्। व्यावृत्तिः- इतरभेदःअलक्ष्यः, तत्र लक्षणलक्षणस्य सत्वादतिव्याप्तिः। तथा हि- इतरभेदे व्यावृत्तौ लक्ष्यतावच्छेदकव्यापकत्वम् अस्ति, कथमिति चेत् - लक्ष्या गौः, लक्ष्यतावच्छेदकं- गोत्वं, तदधिकरणं - गौः, तत्वृति अत्यन्ताभावः - न इतरभेदाभावः इतरभेदस्यैव सत्वात्, किन्तु घटाभावः, तत्प्रतियोगित्वं घटे, तदप्रतियोगित्वं इतरभेदे इति लक्ष्यतावच्छेदकव्यापकत्वम् इतरभेदे अस्ति। एवं लक्ष्यतावच्छेदकव्याप्यत्वं च अस्ति, तथा हि- लक्ष्या गौः, लक्ष्यतावच्छेदकाभाववत्-महिषादयः, तदवृत्तित्वं शृङ्गित्वे, तदवृत्तित्वम् इतरभेदे अस्ति। व्यावर्तकस्यैव लक्षणत्वे अलक्ष्ये इतरभेदे लक्षणलक्षणस्य सत्वात् अतिव्याप्तिः। अतः एतल्लक्षणे व्यावृत्तिभिन्नत्वम् इति विशेषणं देयम्। तथा च व्यावृत्तिभिन्नत्वे सति लक्ष्यतावच्छेदकव्यापकत्वे सति लक्ष्यतावच्छेदकव्याप्यत्वम् इति लक्षणलक्षणं पर्यवस्यति।

**व्यवहारस्यापि लक्षणप्रयोजनत्वमितिमतप्रतिपादनम् -** केचन यथा व्यावृत्तेः लक्षणस्य प्रयोजनत्वं तथा व्यवहारस्यापि लक्षणप्रयोजनत्वम् अभिप्रयन्ति। तथा च गौः - गो इति व्यवहर्तव्या - सास्नादिमत्वात् इति व्यवहारप्रयोजनं लक्षणस्य इति। एतेषां मते पूर्वोक्तमतरीत्या व्यावृत्यादौ अतिव्याप्तिवारणार्थं व्यावृतिभिन्नत्वादिकं न निवेशनीयम्। कुतः इति चेत् व्यवहारस्यापि लक्षणप्रयोजनत्वे लक्षणलक्षणस्य लक्ष्यं भवति यथा व्यावर्तकं, तथा व्यावृत्तिरपि लक्ष्यं भवति।(गौः, गो इति व्यवहर्तव्या, इतरभेदात् इति) अतः लक्ष्ये लक्षणलक्षणस्य लक्ष्यतावच्छेदकसमनियतत्वस्य समन्वयश्चेत् इष्यते एव। अतः अतिव्याप्तिरेव नास्त्येतेषां मते। अतः तत्तद्भिन्नत्वं लक्षणलक्षणे न निवेश्यतेति लाघवम् अस्ति द्वितीयमते इति संक्षेपः।



Scanned with CamScanner

**उपयुक्तग्रन्थसूची :**

1. **न्यायसूत्रम्** - गौतमः, भाष्य-खद्योत-भाष्यचन्द्रयुक्तम्, चौखम्भा संस्कृत सीरीस् आफीस्, वाराणसी।
2. **न्यायभाष्यम्** - महर्षिगौतमकृतन्यायसूत्राणां श्रीवात्स्यायनमुनि-प्रणीतम्, प्रसन्नपदापरिभूषितम्, सुधी प्रकाशनम्, वाराणसी।
3. **तर्कसङ्ग्रहः** - अन्नंभट्टः, न्यायबोधिनी-पदकृत्य-दीपिका-किरणावली व्याख्योपेतः।
4. **तर्कसङ्ग्रहदीपिकासर्वस्वम्** - श्रीकुरुगण्टिरामशास्त्रिः, श्रीवेंकटेश्वरवेदविश्वविद्यालयः, तिरुपतिः।

**सन्दर्भ :**

1. न्या.सू. पृ.सं. 9
2. न्या.भा. पृ.सं. 17
3. त.सं. पृ.सं. 12
4. त.सं.दी.स. पृ.सं. 10
5. त.सं. पृ.सं. 11
6. त.सं. पृ.सं. 12
7. त.सं. पृ.सं. 12
8. त.सं. पृ.सं. 13

Scanned with CamScanner